# ॥ श्रीरामरक्षास्तोत्रम् ॥

आतसीपुष्पसंकाशं पीतवाससमच्युतम् ।
ध्यात्वा वै पुण्डरीकाक्षं श्रीरामं विष्णुमव्ययम् ॥ १ ॥

पातु वो हृदयं रामः श्रीकण्ठः कण्ठमेव च ।
नाभिं त्रातु मखत्राता कटिं मे विश्वरक्षकः ॥ २ ॥

करौ दाशरथिः पातु पादौ मे विश्वरूपधृक् ।
चक्षुषी पातु वै देवः सीतापतिरनुत्तमः ॥ ३ ॥

शिखां मे पातु विश्वात्मा कर्णौ मे पातु कामदः ।
पार्श्वयोस्तु सुरत्राता कालकोटिदुरासदः ॥ ४ ॥

अनन्तः सर्वदा पातु शरीरं विश्वनायकः ।
जिह्वां मे पातु पापघ्नो लोकशिक्षाप्रवर्तकः ॥ ५ ॥

राघवः पातु मे दन्तान् केशान् रक्षतु केशवः ।
सक्थिनी पातु मे दत्तविजयो नाम विश्वसृक् ॥ ६ ॥

एतां रामबलोपेतां रक्षां यो वै पुमान् पठेत् ।
स चिरायुः सुखी विद्वान् लभते दिव्यसम्पदम् ॥ ७ ॥

रक्षां करोति भूतेभ्यः सदा रक्षा तु वैष्णवी ।
रामेति रामभद्रेति रामचन्द्रेति यः स्मरेत् ॥ ८ ॥

विमुक्तः स नरः पापात् मुक्तिं प्राप्नोति शाश्वतीम् ।
वसिष्ठेन इदं प्रोक्तं गुरवे विष्णुरूपिणे ॥ ९ ॥

ततो मे ब्रह्मणः प्राप्तं मयोक्तं नारदं प्रति ।
नारदेन तु भूलोके प्रापितं सुजनेष्विह ॥ १० ॥

सुप्त्वावाऽथ गृहे वाऽपि मार्गे गच्चति एव वा ।
ये पठन्ति नरश्रेष्ठास्ते ज़ेयाः पुण्यभागिनः ॥ ११ ॥

॥ इति श्रीपद्मपुराणोक्तं श्रीरामरक्षास्तोत्रम् ॥